झषोदरी, स्त्री, ( झषो मत्स्य एव उदरं उत्पत्तिस्थानमस्याः । झषस्य उदरं उत्पत्तिस्थानतयास्त्यस्याः इति अर्श आदिभ्योऽजित्यचि । ) व्यासमाता । इति त्रिकाण्डशेषः ॥

झाङ्कृतं, क्ली, ( झाम् इत्यव्यक्तशब्दस्य कृतं करणं यत्र ।) चरणालङ्कारविशेषः । इति धरणिः ॥

झाटः, पुं, (झट+घञ् । ) निकुञ्जः । कान्तारः । व्रणादीनां मार्ज्जनम् । इति मेदिनी । टे, १६ ॥

झाटलः, पुं, (झाटं लातीति । ला+कः ।) घण्टापाटलिः । इत्यमरः । २ । ४ । ३६ ॥

झाटा, स्त्री, ( झट्+णिच्+अच् ततष्टाप् च ।) भूम्यामलकी । इत्यमरः ॥ यूथीवृक्षः । इति शब्दचन्द्रिका ॥

झाटिका, स्त्री, ( झाटा+स्वार्थे कन् । टापि अत इत्वञ्च । ) भूम्यामलकी । इति शब्दचन्द्रिका ॥

झामकं, क्ली, ( झम्+ण्वुल् । ) दग्धेष्टका । इति हारावली । २१४ ॥ झामा इति भाषा ॥

झामरः, पुं, ( झामं रातीति । रा+कः । ) तर्कुशाणः । इतिशब्दरत्नावली ॥ टेकुयार शाण इति भाषा ॥

झार्झरः, पुं स्त्री, ( झर्झरवादनं शिल्पमस्य । "मड्डुकझर्झरादन्यतरस्याम् ।" ४ । ४ । ५६ । इति अण् ।) झार्झरिकः । झर्झरवाद्यकर्त्ता । इति व्याकरणम् ॥

झालिः, स्त्री, व्यञ्जनविशेषः । झारि इति ख्याता । यथा, भावप्रकाशस्य पूर्व्वखण्डे २ भागे ।
"आम्रमामफलं पिष्टं राजिकालवणान्वितम् ।
भृष्टं हिङ्गुयुतं पूतं घोलितं झालिरुच्यते ॥
झालिर्व्वरति जिह्वायाः कुण्ठत्वं कण्ठशोधिनी ।
मन्दं मन्दं निपीता सा रोचनी वह्निबोधिनी ॥"
(झारिः झालिः इति पाठोऽपि क्वचित् दृश्यते ॥)

झावुः, पुं, (झा इति कृत्वा वाति वायुरत्र । वा+डुः । ) वृक्षविशेषः । इति शब्दरत्नावली ॥ झाउ इति भाषा ॥

झावुकः, पुं, (झावुरेव । स्वार्थे कन् ।) वृक्षविशेषः । झाउ इति भाषा । तत्पर्य्यायः । पिचुलः २ झावुः ३ झावूः ४ । इति शब्दरत्नावली ॥

झिङ्गाकं, क्ली, ( लिगि+आकन् । पृषोदरात् साधुः । ) फलविशेषः । झिङ्गा इति भाषा । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । आमवातमन्दाग्निकारित्वञ्च । इति राजवल्लभः ॥

झिङ्गिनी, स्त्री, (लिगि+णिनिः । पृषोदरात् साधुः । ङीप् च ।) जिङ्गिनीवृक्षः । इति भावप्रकाशः ॥ उल्का । इति शब्दरत्नावली ॥

झिङ्गी, स्त्री, ( लिगि+अच् ङीष् । पृषोदरात् साधुः । ) जिङ्गिनीवृक्षः । इति भावप्रकाशः ॥

झिञ्झिमः, पुं, ( झिम् इत्यव्यक्तशब्दं कृत्वा भ्रमति अत्ति वृक्षादीन् दहतीत्यर्थः । ( भ्रम भक्षे+अच् । पृषोदरादित्वात् साधुः । ) दावाग्निः । इति हारावली । २६८ ॥

झिञ्झिरिटा, स्त्री, क्षुपविशेषः । झिञ्झिरीटा । इति भाषा । तत्पर्य्यायः । चला २ पीतपुष्पा ३ झिञ्झिरा ४ रोमाश्रयफला ५ वृत्ता ६ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । रक्तातिसारनाशित्वम् । वृष्यत्वम् । सन्तर्पणत्वम् । बल्यत्वम् । मद्दिषीक्षीरवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

झिञ्झी, स्त्री, ( झिञ्झा इत्यव्यक्तशब्दोऽस्त्यस्याः । अच् ततो ङीष् च । ) झिल्ली । यथा,—
"झिञ्झीवाव्यक्तमधुरा कूजन्ती मधुराकृतिः ॥"
इत्यागमः ॥

झिण्टी, स्त्री, (झिमिति कृत्वा रटतीति । रट्+अच् । ङीष् च पृषोदरात् साधुः । ) पुष्पवृक्षविशेषः । झाँटी इति भाषा । तत्पर्य्यायः । सैरीयकः २ इत्यमरः । २ । ४ । ७५ ॥ कण्टकुरण्टः ३ सैरेयकः ४ झिण्टिका ५ । इति राजनिर्घण्टः ॥ नीलझिण्ट्याः पर्य्यायः । बाणा १ दासी २ आर्त्तगलः ३ । इत्यमरः । २ । ४ । ७४ ॥ वाणः ४ आर्त्तगलः ५ इति तट्टीका ॥ सहचरः ६ नीलकुरण्टकः ७ । इति रत्नमाला ॥ अरुणझिण्ट्याः पर्य्यायः । कुरवकः १ । इत्यमरः ॥ पीतझिण्ट्याः पर्य्यायः । कुरण्टकः १ सहचरी २ । इत्यमरः ॥ सहचरः ३ सहाचरः ४ । इति तट्टीका ॥ वीरः ५ पीतपुष्पः ६ दासी ७ कुरण्टकः ८ । इति रत्नमाला ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयशूलवातकफशोफकासत्वग्दोषनाशित्वञ्च । कुन्दरञ्जनम् । इति राजनिर्घण्टः ॥

झिरिका, स्त्री, ( झिरीति अव्यक्तशब्देन कायति शब्दायते इति । कै+कः टाप् च । ) झिल्ली । इति शब्दरत्नावली ॥

झिरी, स्त्री, ( झिर् इत्यव्यक्तशब्दो अस्त्यस्याः । अच् ङीष् ।) झिल्ली । इति शब्दरत्नावली ॥

झिल्लिः, स्त्री, ( झिर् इत्यव्यक्तशब्देन क्षिणोतीति । क्षिण्+डिः । रस्य लः । ) वाद्यविशेषः । यथा, गूढार्थदीपिकायाम् ।
"घण्टाशङ्खस्तथा भेरीमृदङ्गौ झिल्लिरेव च ।
पञ्चानां शस्यते वाद्यं देवताराधनेषु च ॥"

झिल्लिका, स्त्री, (झिर् इत्यव्यक्तशब्दं क्षिणोतीति । क्षिण्+डिः रस्य लत्वे साधुः । ततः स्वार्थे कन् ।) झिल्ली । (यथा, रामायणे । २।६६।११।
"झिल्लिकाविरुतैर्दीर्घैः रुदतीव समन्ततः ।")
आतपस्य रुचिः । विलेपनभेदम् । इति हेमचन्द्रः ॥ झिल्लिकारावः । उद्वर्त्तनवस्त्ररुचिः । इति शब्दरत्नावली ॥ (उद्वर्त्तनवस्त्रम् । झिण्टी । इति मेदिनी । के, ८६ ॥ )

झिल्ली, स्त्री, ( झिल्लि+कृदिकारादिति वा ङीष् ।) कीटविशेषः । झिँझिपोका इति भाषा । तत्पर्य्यायः । झिल्लीका२ झिल्लिका३ झिरिका४ झीरुका ५ झिरी ६ चीरिका ७ चीरिल्लिका ८ चिल्ली ९ भृङ्गारी १० चीरुका ११ । इति शब्दरत्नावली ॥ चीरी १२ । इत्यमरः ।२।५। २८ ॥ चीरुका १३ । इति तट्टीका ॥ ( यथा, भागवते, । ६ । १३ । ५
"अट्टहासझिल्लीस्वनकर्णशूल-
उलूकवाग्भिर्व्यथितान्तरात्मा ॥")
आतपरुचिः । वर्त्तौ । उद्वर्त्तनांशुकम् । इति मेदिनी ॥ स्थालीलग्नदग्धान्नम् । इत्यजयपालः ॥

झिल्लीकण्ठः, पुं, ( झिल्लीवत् कण्ठः कण्ठशब्दोऽस्य । ) गृहकपोतः । इति त्रिकाण्डशेषः ॥

झिल्लीका, स्त्री, ( झिल्ली+संज्ञायां कन् ततष्टाप् । ) झिल्लिका । इति हेमचन्द्रः ॥

झीरुका, स्त्री, ( झिर इति कृत्वाव्यक्तं रौतीति । रु+शब्दे बाहुलकात् कक् टाप् च ।) झिल्ली । इत्यमरः । २ । ५ । २८ ॥

झु, ङ गत्याम् । (भ्वा-आत्मं-सकं-अनिट् । ) जुङस्थाने झुङ इत्यपि केचित् । ङ, झवते । इति दुर्गादासः ॥

झुण्टः, पुं, (झट् संहतौ+घञ् पृषोदरात् साधुः ।) स्तम्बः । अप्रकाण्डवृक्षः । इति शब्दचन्द्रिका ॥

झुमरिः, स्त्री, रागिणीविशेषः । यथा,—
"प्रायः शृङ्गारबहुला माध्वीकमधुरा मृदुः ।
एकैव झुमरिर्लोके वर्णादिनियमोज्झिता ॥
अतो लक्षणमेतस्या नोदाहारि विशेषकम् ।
इदं हि शालनं रूपं प्रसिद्धं नृपरञ्जनम् ॥"
इति सङ्गीतदामोदरः ॥

झूणिः, पुं, क्रमुकभेदः । स्त्री, दुष्टदेवस्मृतिः । इति मेदिनी । णे, १७ ॥

झॄ, ष य जरे । गतवद्‌ध्योभाव इति यावत् । (दिवां-परं-अकं-अनिट् ।) इति कविकल्पद्रुमः ॥ ष, झरा । य, झीर्य्यति । इति दुर्गादासः ॥

झोडः, पुं, गुवाकवृक्षः । इति भूरिप्रयोगः ॥

झ्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ॥)

---

# ञ

ञ, ञकारः । स व्यञ्जनदशमवर्णः चवर्गपञ्चमवर्णश्च । ( असौ तु अर्द्धमात्राकालेनोच्चार्य्यः । ) अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥*॥ अस्योत्पत्तिर्यथा,—
"विसर्गस्तालुगः सोष्मा यं चवर्गश्च यस्तथा ॥"
इति प्रपञ्चसारः ॥*॥
( पाणिनिमते तु अस्योत्पत्तिस्थानं नासिकान्विततालु । अस्योच्चारणे जिह्वामध्येन तालुमध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः । संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः । मातृकान्यासेऽस्य वामहस्ताङ्गुल्यग्रे न्यासक्रिया स्यात् । ) वर्णोद्धारतन्त्रमालायां अस्य लेखनप्रकारो यथा,
"कुण्डलीरूपमास्थाय दक्षतो वामतस्ततः ।
ऋजुचाधोगता मात्रा वामतः कुञ्चिता पुनः ॥
तिष्ठन्ति तासु नित्यासु सर्व्वे ब्रह्मादयः सदा ।
कुण्डलीद्वयरूपा तु या मात्रा मध्यतः स्थिता ॥
महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥*॥
चतुर्भुजां धूम्रवर्णां कृष्णाम्बरविभूषिताम् ।
नानालङ्कारसंयुक्तां जटामुकुटराजिताम् ॥